# वैयाकरणसिद्धान्तकौमुदी

## स्त्रीप्रत्ययप्रकरणम् (१२)

## १२.०२.२०१३

# ४८९. अन्तर्वत्पतिवतोर्नुक् (४.१.३२)

- पदद्वयम् । अन्तर्वत्-पतिवतोः, नुक् ।
- ‘स्त्रियाम्’ (४.१.३) इति अधिक्रियते ।
- एतयोः स्त्रियां नुक् स्यात् ।
- एतयोः स्त्रियां नुगिति ।
- ‘ऋन्नेभ्यो ङीप्’ (४.१.५) ।
- गर्भिण्यां जीवद्भर्तृकायां च प्रकृतिभागौ निपात्येते ।
- गर्भिण्यामिति ।

- तत्र अन्तः अस्ति अस्यां गर्भः इति विग्रहे अन्तश्शब्दस्य अधिकरणशक्तिप्रधानतया अस्तिसामानाधिकरण्याभावाद् अप्राप्तो मतुप् निपात्यते ।
- तत्रेति ।

- पतिवत्नी इत्यत्र तु वत्वं निपात्यते ।
- वत्वमिति ।

- अन्तर्वत्नी । पतिवत्नी ।

- प्रत्युदाहरणं तु अन्तरस्त्यस्यां शालायां घटः ।
- प्रत्युदाहरणं त्विति ।
- पतिमती पृथिवी ।

# ४९०. पत्युर्नो यज्ञसंयोगे (४.१.३३)

- पदद्वयम् । पत्युः, नः, यज्ञसंयोगे ।
- पतिशब्दस्य नकारादेशः स्याद् यज्ञेन सम्बन्धे ।
- वसिष्ठस्य पत्नी ।
- तत्कर्तृकस्य यज्ञस्य फलभोक्त्रीत्यर्थः ।
- दम्पत्योः सहाधिकारात् ।
- तत्कर्तृकस्येति ।

# ४९१. विभाषा सपूर्वस्य (४.१.३४)

- पदद्वयम् ।
- 'पत्युर्नो यज्ञसंयोगे' (४.१.३३) इत्यतः 'पत्युः, नः' इति अनुवर्तते ।
- पतिशब्दान्तस्य सपूर्वस्य प्रातिपदिकस्य नो वा स्यात् ।
- यज्ञसंयोगाभावेऽपि, अप्राप्तविभाषेयम् ।
- गृहस्य पतिः गृहपतिः, गृहपत्नी ।
- गृहपतिः, गृहपत्नीति ।
- 'अनुपसर्जनस्य' इतीहोत्तरार्थम् अनुवृत्तमपि न पत्युः विशेषणम्, अपि तु तदन्तस्य ।
- तेन बहुव्रीहावपि । दृढपत्नी , दृढपतिः।

- वृषलपत्नी, वृषलपतिः ।
- अथ ‘वृषलस्य पत्नी’ इति व्यस्ते कथमिति चेन्न ।
- व्यस्ते इति ।
- पत्नीव पत्नीत्युपचारात् ।
- पत्नीवेति ।
- यद्वा, आचारक्विबन्तात्कर्तरि क्विप् ।
- यद्वेति ।
- अस्मिंश्च पक्षे, पत्नियौ, पत्नियः इतीयङ्विषये विशेषः ।

- सपूर्वस्य किम्?
- गवां पतिः स्त्री ।
- सपूर्वस्येति किमिति ।
- गवां पतिः स्त्रीति ।

# ४९२. नित्यं सपत्न्यादिषु (४.१.३५)

- पदद्वयम् । नित्यम्, सपत्न्यादिषु ।
- 'पत्युर्नो यज्ञसंयोगे' (४.१.३३) इत्यतः 'पत्युः, नः' इति अनुवर्तते ।
- पूर्वविकल्पापवादः ।
- पूर्वविकल्पेति ।
- समानस्य सभावोऽपि निपात्यते ।
- समानः पतिः यस्याः सा सपत्नी ।
- एकपत्नी । वीरपत्नी ।